## READING - 3

यदा यदा दशरथो ज्येष्ठं पुत्रं रामं पश्यति तदा तदा परममानन्दमनुभवति । रामो ऽपि मत्या युतः । स सर्वान्वेदानवगच्छति धनुर्वेदस्यापि पारं गच्छति । यदा स बाणमुद्धरति तदा देवा अपि कम्पन्ते स्वर्गे । एकदा कश्चन मुनिरयोध्यां प्रत्यागच्छति । दशरथं प्रति वदति च । भो नृप । वयं मुनयो राक्षसैरत्यन्तं पीडिता भवामः । त्वमेव प्रजानां रक्षको ऽसि । यदि त्वं न कंचन वीरं प्रेषयसि तर्हि वयं सर्वे नष्टाः स्म इति । दशरथो वदति । भो मुने । येभ्यो राक्षसेभ्य ऋषयो ऽप्युद्विजन्ते तेषां हनने कः समर्थ इति । मुनिर्वदति । कौचन समर्थौ वीरौ वर्तेते अयोध्यायामिति । कौ ताविति पृच्छति दशरथः ।तव पुत्रौ रामो लक्ष्मणश्चेति भाषते द्विजः। यदा नृपो मुनेर्वचनं शृणोति तदा सो ऽतीव दुःखितो भवति । यतो ब्राह्मणो मनुष्येषु देवो भवति ततो नृपो ऽपि ब्राह्मणस्य वचनं करोति । ततः प्रियौ च पुत्रौ वनं प्रेषयति ब्राह्मणेन सह ॥